नं० ४९२०

नाम – देवीरहस्ये सूर्यकवचं वज्रपञ्जर०

कर्त्ता – ×

पत्रसंख्या – २ पत्रम् सं० ×

विषय० – तंत्रम्

ॐ श्रीं गणेशाय नमः । ॐ श्री सूर्याय नमः । ॐ यो देवदेवो भगवान् भास्करो महसां निधिः । गायत्री-
नायको भास्वान् सवितेति प्रगीयते । तस्याहं कवचं दिव्यं वज्रपंजरकाभिधं । सर्वमंत्रमयं
गुह्यं मूलविद्यारहस्यकं । सर्वपापहरं देवि दुःखदारिद्र्यनाशनं महाकुष्ठहरं देवि सर्व-
रोगनिवर्हणं । सर्वशत्रुसमूहघ्नं संग्रामे विजयप्रदं । सर्वतेजोमयं सर्वदेवदानवपू-
पूजितं । रणे राजभये घोरे सर्वोपद्रवनाशनं । मातृकावेष्टितं वर्म भैरवाननिर्गतं ।
ग्रहपीडाहरं देवि सर्वसंकटनाशनं । धारणादस्य देवेशि ब्रह्मा लोकपितामहः ।
विष्णुर्नारायणो देवि रणे दैत्यान् जयिष्यति । शंकरः सर्वलोकेशो वासवोऽपि
दिवस्पतिः । ओषधीशः शशी देवि शिवोऽहं भैरवेश्वरः । मंत्रात्मकं परं वर्म सवितुः
सारमुत्तमं यो धारयेद् भुवि सुदिने रविवारे महेश्वरि । स राजवल्लभो लोके
तेजस्वी वैरिमर्दनः । बहुनोक्तेन किं देवि कवचस्यास्य धारणात् । इह लोके
धनारोग्य वृद्धिर्भवति नान्यथा । परत्र परमा मुक्तिर्देवानामपि दुर्लभा ।
कवचस्यास्य सुमुखो मूलविद्यामयस्य च । वज्रपंजरकाख्यस्य मुनिर्ब्रह्मा समीरितः ।
गायत्री छन्द इत्युक्तं देवता सविता स्मृतः । मायाबीजं शरत् प्रोक्तं शक्तिर्लक्ष्मी[illegible]
स्वाहा । सकलार्थसाधने देवि विनियोगः प्रकीर्तितः । ओं अस्य श्री वज्रपंजरकाख्यस्य
सूर्यकवचस्य श्री ब्रह्मा ऋषिः । गायत्री छन्दः । श्री सविता देवता । ह्रीं बीजं । सः शक्तिः ।
नमः कीलकं । सकलार्थसाधने सूर्यकवच पाठे विनियोगः । ॐ गायत्री ।

ॐ तत्पुरुषाय विद्महे भास्कराय धीमहि तन्नः सूर्यः प्रचोदयात् ॥ अथ ध्यानं ।

ॐ माणिक्यमुकुट मरीचि हरीव भास्वल्ललाटं कनककलशहस्तांभोज हस्तारविंदं ।

सू. क. निखिलनिगमगम्यं विश्वरालिंगितांगं मनसि सरसिजस्थं सूर्यमीशानमानम् ।

ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः शिरः पातु ॐ सूर्यो मन्त्रविग्रहः । ॐ कं खं गं घं ललाटं मे सदा

रविः पातु चिदात्मकः । ङं चं छं जं पातु नेत्रे ह्रीं ममाक्षणा भास्करः । ञं टं ठं डं

२ श्रुती पातु सः सर्वजगदीश्वरः । ढं णं तं थं पातु गण्डौ सः सूर्यः सुरपूजितः ।

दं धं नं पं च नासां मे पातु सामर्थ्यप्रभुः । फं बं भं दन्तं पातु पं योगीश्वरपूजितः ।

। लं वं शं षं गलं पातु कं नारायणवल्लभः । यं कं वं मं मम स्कन्धौ पातु मं महोज्ज

निधिः । यं रं लं वं भुजौ पातु मूलं सकलनायकः । शं षं सं हं पातु वक्षो मूलमन्त्र

मयो ध्रुवः । कुक्षिः कुक्षिं सदा पातु ग्रहनाथो दिनेश्वरः । ॐ मं ... मे पातु

पृष्ठं दिवसनायकः । ॐ ह्रां ह्रीं ह्रूं उं ऊं ऋं ॠं नाभिं पातु तमोपहः । ऌं ॡं एं ऐं ओं औं

अं अः लिंगं मे पातु ... । कं खं गं घं ङं चं छं जं झं कटिं पातु दिवाकरः । टं ठं डं ढं

णं तं थं जानू ... पातु । पं फं बं भं ... जंघे मे पातु ... । यं रं लं वं —

लं ह्रां: पातु मूर्धं पादौ गभस्तिनु:। ॐ गं ठं नं सं मे पातु सविता सकलं वपु:। सोम: पूर्वं च मे
पातु सौम्यो मां सदावतु। कुजो मां दक्षिणे पातु नैर्ऋत्यां गुरुरेव मां। पश्चिमे मां सित:
पातु वायव्यां मां शनैश्चर:। उत्तरे मां तम: पातु ऐशान्यां मां शिखी तथा। ऊर्ध्वं मां
पातु मिहिरो मामधस्ताज्जगत्पति:। प्रभाते भास्कर: पातु मध्याह्ने मां दिनेश्वर:।
सायं वेदप्रिय: पातु निशायां विस्फुरापति:। सर्वत्र सर्वदा सूर्य: पातु मां चक्रनायक:।
रणे राजकुले द्यूते विवादे शत्रुसंकटे। संग्रामे च ज्वरे घोरे पातु मां सविता प्रभु:।
ॐ ॐ ॐ उ उ ऊं उ उ इ [illegible] सूर्योऽवतान्मां भयात्। ह्रां ह्रीं ह्रुं ह ह [illegible] ह्लौ:
ह स ह्लौ हंसौ ऽवतात् सर्वत:। स: त: सं सस सो नृपान्तरचौराज्ज्वरात् दुःखात् संक-
टात्। पापान्मां कुष्ठनाशको ऽपि सविता ॐ ह्रीं ह्लौं सर्वदा। ह्रां ह्रीं ह्रूं हंस:
ताराचक्रे नरतिमिरो मां [illegible] भयात् भास्करो। रं रीं रं रूं रं रैं [illegible] कुष्ठ [illegible] स्वल्पा-
-भयात् [illegible] [illegible] महाभयभयान्मां पातु मार्तण्डको। मूलं व्याप्त तनु: सदावतु
दं हंस: [illegible] शुभप्रद। इतीदं कवचं दिव्यं वज्रपञ्जरकाभिधं। सर्वदेवरहस्यं च मातृकां
मंत्रवेष्टितं। महारोगभयघ्नं च पापघ्नं मन्मुखोदितं। गुह्यं ममारभ्यं पुण्यं सर्वदम्-।
— मार्तंड शिवं।

लिखित्वा रविवारे तु तिष्ये वा जलमध्ये प्रिये । उच्च गन्धेन दिव्येन स्वर्णाद्यैः श्री देवि पार्वती
उशीरेण कुङ्कुमेन भूर्जे लिख्य महेश्वरि । कान्ता कण्ठे [illegible] बन्धी सवञ्च यादयेद् यदि । श्वेत-
सूत्रेणैव [illegible] बध्द्वा भेदुर्टीं । सोऽवर्णी [illegible] संवत्सरं धारयेद्यो नरो भुजे ।
स्‌: क: [illegible] रिपुं जयेद् देवि वादीनां दीप्त [illegible] । राजमान्यो भवेन्नित्यं सर्वलोकवशो
भवेत् । कण्ठस्था पुत्रदा देवि कुक्षिस्था रोगनाशिनी । शिरःस्था गुटिका दिव्या राज-
-लोकवशङ्करी । भुजस्था धनदा नित्यं तेजो वृद्धि विवर्धिनी । वन्ध्या वा काक-
२ वन्ध्या वा मृतवत्सा च याङ्गना । कण्ठे तथा धारयेन्नित्यं बहुपुत्रा प्रजायते । यस्य
देहे भवेन्नित्यं गुटिकैषा महेश्वरी । महास्त्राणीन्द्रमुक्तानि ब्रह्मास्त्रादीनि पार्वति ।
2 तद्देहं प्राप्य व्यर्थानि भविष्यन्ति न संशयः । त्रिकालं यः पठेन्नित्यं कवचं वज्र-
पञ्जरं तस्य सद्यो महादेवि सिद्धिर्भवति [illegible] भवेत् । [illegible] कवचं देवि
पुनर्जन्म यः [illegible] तस्य पूजार्जितं पुण्यं जन्मकोटिषु निष्फलं । [illegible]
पठेद्यस्तु सप्तकृत्वा रविवारे महाकुष्ठार्दितो देवि मुच्यते नात्र संशयः ।
निरोगो यः पठेद्यस्तु दरिद्रो वज्रपञ्जरं लक्ष्मीवान् जायते देवि सद्यः सर्वप्रतापवान् ।
[illegible] यः पठेद्देवि कवचं प्रत्यहं प्रिये । इह लोके श्रियं भुक्त्वा देहान्ते परमं पदं
प्राप्नुयात् ॥ इति श्री देवि [illegible] वज्रपञ्जराख्यं [illegible] कवचं सम्पूर्णम् । शुभमस्तु